International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2025; 2(6): 136-138
© 2025 IJMH
www.themultijournal.com
Received: 15-12-2025
Accepted: 27-12-2025
Publish : 29-12-2025

**Dr. Monojit Mukherjee**
Ph.d from Jawaharlal Nehru-University, New delhi.

**Correspondence:**
**Dr. Monojit Mukherjee**
Ph.d from Jawaharlal Nehru-University, New delhi.

# अद्वैतवेदान्तदिशा मोक्षस्वरूपप्रतिपादनम्

**Dr. Monojit Mukherjee**

**भूमिका -** मुच् धातोः क्तिन् प्रत्यये सति मुक्तिः इति शब्द भवति, अद्वैतवेदान्तोक्तदिशा ब्रह्मज्ञानस्य कृते मनुष्याणां चित्तशुद्धिः भवेत्। चित्तशुद्धेः कृते यागयज्ञादयः कर्त्तव्याः। उपासनस्य एका महती भूमिका वर्त्तते, तत्र सगुणब्रह्म अर्थात् ईश्वरस्य आराधना कर्त्तव्या चित्तशुद्धेः अनन्तरं वेदान्तवाक्यानि असकृद् श्रोतव्यानि, मन्तव्यानि, निदिध्यासतव्यानि च। यदा मनुष्याणां ब्रह्मज्ञानं जायते, तस्यां दशायां मनुष्याः जराबन्धदुःखै मुच्यन्ते, न कोऽपि संस्कारः अस्ति, न कोऽपि दोषः अस्ति [1] । वेदान्तज्ञानस्य कृते, यागयज्ञकर्म, उपासनं, इति इमे अपेक्षन्त, यतो हि एतेषां भूमिका महती वर्तते। असकृत् अभ्यासेन शुद्ध अन्तःकरणे ब्रह्मसाक्षात्कारः सम्भवति। ब्रह्मज्ञानस्य कृते मुक्तौ इच्छा भवितव्या तत् मुमुक्षत्वम् इति कथ्यते।[2] मुक्तेः अस्यां दशायां मुमुक्षु धर्म-अधर्म, सुख दुख इति एभिविषयैः साकं न सम्बन्ध्यते।[3] यदा मनुष्याणां ब्रह्मज्ञानं न भवति तदा ते जराबन्धसुखदुःखैः साकं अविद्यावशात् सम्बन्धति। यदा ब्रह्मज्ञानं जायते तदा अविद्या नश्यते, तेन जराबन्धवत् काठिन्यम् अपि नश्यते च। वेदान्तग्रन्थेभ्यः उत्पद्यते यज्ज्ञानं तद् वेदान्तविज्ञानं इति कथ्यते। वेदान्तविज्ञानं येन निश्चीयते तस्य मोक्षेच्छा अस्ति इति निश्चीयते। सर्वकर्मपरित्यागरूपयोगात् अर्थात् केवलं ब्रह्मनिष्ठास्वरूपात् शुद्ध- ब्रह्मज्ञानं अनुभूयते।

**विषयः**

मोक्षप्राप्तिसंन्दर्भ मुण्डकोपनिषदि कथ्यते, यत् वेदान्तज्ञानं निश्चीयते, तै ब्रह्मलोके अमरत्वभावः प्राप्यते। यथा-

**'वेदान्तविज्ञानसुनिश्चितार्थाः**
**सन्यासंयोगाद्यतयः शुद्धसत्त्वाः।**
**ते ब्रह्मलोकेषु परान्तकाले**
**परामृताः परिमुच्यन्ति सर्वे।।**[4]

पुनः मोक्षस्वरूपसन्दर्भ मुण्डकोपनिषदि कथ्यते प्राणादिपञ्चदशकलाः स्वाश्रये तिष्ठन्ति, सर्वाः देवताः स्वप्रतिदेवतायां लीयन्ते, सञ्चितकर्म, विज्ञानमयात्मा, इत्यादयः परब्रह्मणि लीयन्ते, यथा-

**'गताः कलाः पञ्चदश प्रतिष्ठा**
**देवाश्च सर्वे प्रतिदेवतासु।**
**कर्माणि विज्ञानमयश्च आत्मा**
**परेऽव्यये सर्व एकीभवन्ति'।।**[5]

श्वेताश्वतरोपनिषदि मुक्तिः वण्यते, ब्रह्म सर्वोत्कृष्टम्, ब्रह्मणि भोक्ता भोग्य नियन्ता त्रयः पदार्थाः सन्ति, ब्रह्मवेत्ता ब्रह्मणि लीयते, समाधौ जन्ममरणात् मुच्यते, यथा-

**'उङ्गीतमेतत्परमं तु ब्रह्म**
**तस्मिंस्त्रयं सुप्रतिष्ठाक्षरं च।**
**अत्रान्तरं ब्रह्मविदो विदित्वा**
**लीना ब्रह्मणि तत्परा योनिमुक्ताः'।।**[6]

मुण्डकोपनिषद् ब्रह्मसाक्षात्कारस्य फलसन्दर्भ उच्यते परावरब्रह्म साक्षात् क्रियते चेत् जीवस्य हृदयग्रन्थि छिद्यते, सर्वे संशयाः नश्यन्ते कर्म क्षीयते यथा-

**"भिद्यते हृदयग्रन्थिश्छिद्यत सर्वसंशयाः।**

**क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावरे '।।**[7]

पुनः ईशावास्योपनिषदि मोक्षदशा सन्दर्भ आलोच्यते, यत् यदा मोक्षः अनुभूयते, तत्र शोकस्य, मोहस्य, भयस्य च अस्तित्वं एवं न भवति यथा-

**तत्र को मोहः कः शोकः एकत्त्वमनुपश्यतः ।**[8]

वृहदारण्यकोपनिषदि कथ्यते ब्रह्मज्ञानस्य फलं मोक्षः उत अविद्यानिवृत्तिः। यथा फलं मोक्षोऽविद्यानिवृत्तिर्वा [9]। पुनः नैष्कर्म्यसिद्धौ उल्लिखितं वर्त्तते यत्, अविद्या अस्य संसारस्य वीजम् तस्य नाशो मुक्तिः इति। यथा अविद्यासंसृते वीजं तन्नाशो मुक्तिरात्मनः।[10]

पुनः अद्वैतसिद्धौ उच्यते अविद्यायाः निवृत्ति एव मोक्षः। यथा "अविद्यास्तमयो मोक्षः" [11]

श्रीमद्भगवद्गीतायां उल्लिखितं वर्त्तते, यदा ब्रह्मज्ञानं जायते तदा मुक्ति मिलति। यथा 'ज्ञानादेव तु कैवल्यम्'।[12]

पुनः वेदान्तसारे उल्लिखितं वर्त्तते, यत् यदा अविद्या निवर्त्तते तदा ब्रह्मज्ञानं जायते, सा एव दशा मोक्षः यथा मोक्षो नाम विद्यानिरस्ताविद्यातत्कार्य ब्रह्मात्मनावस्थानम्'[13] ।

**मोक्षस्य भेदः**

अद्वैतवेदान्तदर्शने मुक्तिः चतुर्धा एव विभज्यते। यथा जीवन्मुक्तिः, विदेहमुक्तिः, सद्योमुक्तिः, क्रममुक्तिः च। यदा जीवः शरीरे स्थिते सति ब्रह्मज्ञानं जायते, सा दशा जीवन्मुक्तिः। यदा प्रारब्धकर्मनाशात् फलोपभोगात् अनन्तरं देहः नश्यते सा दशा विदेहमुक्तिः। कदाचिद् ब्रह्मज्ञानं यदा जायते क्षणे मुक्ति मिलति, सा दशा सद्योमुक्तिः। सगुणब्रह्मणः उपासकः यदा उपासनेन ईश्वरसान्निध्यं प्राप्यते सा दशा क्रममुक्ति भवति।

अधुना जीवन्मुक्ति, विदेहमुक्ति इति द्वयोः सन्दर्भे नीम्ने प्रतिपादितं वर्त्तते वेदान्तसारे उक्तम् अस्ति जीवन्मुक्तिसन्दर्भ स्वस्वरूपा-खण्डब्रह्मज्ञानात्, अज्ञाननाशन स्वस्वरूपाखण्डब्रह्मसाक्षात्कारेण सञ्चितप्रारब्धकर्मणां, विपययादिनां च नाशेन सा ब्रह्मवेत्ता अखिलब्रह्मनिष्ठ एव भवति। यथा-जीवोन्मुक्तो नाम स्वस्वरूपाखण्ड-ब्रह्मज्ञानेन तदज्ञानबाधनद्वारा स्वस्वरूपाखण्डब्रह्मणि साक्षात्कृतेऽ-ज्ञानतत्कार्यसञ्चितकर्मसंशयविपर्ययादीनामपि बाधितत्त्वादखिलबन्ध-नरहितो ब्रह्मनिष्ठः।[14]

**विदेहमुक्तिः**

विदेहमुक्तिसन्दर्भ वेदान्तसारे उल्लिखितं वर्त्तते, जीवन्मुक्त्या इदं शरीरं सुखदुःखस्वरूपप्रारब्धकर्माणि उपभूज्यन्ते, परन्त " प्रारब्धकर्माणि उपभोगात् परं प्रारब्धाश्रयभूतलिङ्गशरीराभावात् लिङ्गशरीराणि ब्रह्मणि लियन्ते।[15]

**सद्यमुक्तिः**

शङ्कराचार्ये आलोच्यते यत् आत्मज्ञानं सद्योमुक्तेः कारणम् योगिनः सम्यग्दर्शनेन सन्तुष्यन्ते सा सद्यमुक्तिः[16]

पुनः सर्वज्ञात्ममुनिभिः उच्यते यत् ज्ञानरूपाग्निना कार्यप्रपञ्चः नश्यते इथ्थं सम्यग्ज्ञानं सद्यमुक्तिः इत्युच्यते।[17]

**क्रममुक्तिः**

केचन साधकाः ब्रह्मणा सह अभेदः स्थाप्यन्ते, तेन एव मुक्तिः लभ्यते, तेषु कैश्चिद् पुरुषैः विलम्बो जायते। कार्यब्रह्मोपासनेन मुक्तिः लभ्यते, कैश्चिद् एव विद्वद्भिः उच्यते अपराविद्यया साकारब्रह्म ज्ञायते, धर्मज्ञानानुसारं तैः मनुष्यैः स उपास्यते, देवयानन प्राप्यमाना सामुक्ति क्रममुक्ति इत्युच्यते।[18]

**उपसंहारः**

अयमेव सिद्धान्तः आयाति यत् ब्रह्मज्ञानं जायते चेत् मुक्तिः आगच्छति यावता ब्रह्मज्ञानं न जायते तावता मुक्तिः न आगम्यते, अतः ब्रह्मज्ञानस्य कृते चित्तशुद्धिः अपेक्ष्यते। यागादिकर्मणा चित्तशुद्धिः भवति, चित्तशुद्धि भवति चेत् वेदान्तज्ञानेऽधिकारी भवति। गुरुमुखात् वेदान्तवाक्यानि श्रवणात् परं मननं कर्त्तव्यम्, तदनन्तरं निदिध्यासितव्यम् श्रवण-मनन- निदिध्यासन इत्येभि ब्रह्मज्ञानं दढं भवति, तेन मुक्तिः प्राप्तुं सुलभं भवति। ध्रुवसंस्कारात् ज्ञानप्राप्ति भवति, ज्ञानं लभ्यते चेत् सर्वे सन्देहाः निराकियन्ते, सर्वे सन्देहाः निराकियन्ते चेत् ब्रह्मसाक्षात्कार भवति। शुद्धान्तः करणं ब्रह्मज्ञानलाभे नितराम् अपेक्ष्यते । ब्रह्मज्ञानलाभस्य कृते ब्रह्मविदो समीपे गमनं नितराम् अपेक्ष्यते, तेन गमनेन ब्रह्मज्ञानम् अनुभूयते । ब्रह्मज्ञानम् अनुभूयते चेत् शुभवासनानाम् अनुवृत्ति भवति । ब्रह्मसाक्षात्कारात् अनन्तरं अशुभवासनापरित्यागसङ्कल्पः दृढः भवति ।

**ग्रन्थसूची**


अद्वैतसिद्धिः मधुसूदनसरस्वतीकृता. चौखम्बासंस्कृतसीरीज, वाराणसी, 2011

ईशादि नौ उपनिषद् गीता प्रेस गोरखपुर, 2012

उपनिषत्सङ्ग्रहः रन्धीरप्रकाशनम्, नवदेहली, 2017

छान्दोग्योपनिषद् गीताप्रेस, गोरखपुर, 2015

ब्रह्मसूत्रशाङ्करभाष्यभामतीव्याख्या. वाचस्पतिमिश्रकृतः मोतिलाल वणारसी दास नवदेहली, 2009

ब्रह्मसूत्रशाङ्करभाष्यरत्नप्रभाटीका. गोविन्दानन्दकृतः भारतीय बुक कर्पोरेशन नवदेहली, 2010

श्रीमद्भगवद्गीताशाङ्करभाष्यम् शङ्कराचार्यकृतम्, गीताप्रेस गोरखपुर, 2002

सांख्यकारिका. ईश्वरकृष्णकृता. भारतीयविद्याप्रकाशनम्, नवदेहली, 2007

सांख्यसूत्रम्, कपिलमुनिकृतम्, चाखम्बासंस्कृतसंस्थानम्, वाराणसी, 2008

सिद्धान्तलेशसंग्रहः अप्पयदीक्षितकृतः चौखम्बासंस्कृतसंस्थानम्, वाराणसी, 1937

**आंग्लोग्रन्थाः**

Aparokshanubhuti by Sankaracharya, Advaita ashrama, Kolkata, 1987

Atmabodha by sankaracharya. Ramakrishna Matha, Chennai, 1947

Brahmasutraanuvruti by Jaynendra Saraswati. Sankaracharya vidyapitham, Varanasi, 1987

Brahmasutrabhasyadeva. Bharatiya Vidya Prakashan, Delhi, 1998

Brahmasutrasankarabhasyam. Parimal prakashan, Delhi, 1981

Brahmasutrasankarabhasyabhamti commentary by Bachaspati Mishra. Sanskrit Pustak Bhandar, Kolkatta, 1973

The Brahmasutra and their principal commentary by V.M Apte Munshiram Manoharlal, pvt. Ltd. 2001

Upanishads by F. Max. Muellar. Prakash Books India Pvt. Ltd. 2001

Vedantaparibhasha by Dharmaraja Adhvarindra Choukhamba Sanskrit series, Varanasi, 1990

**कोशग्रन्थाः**

अमरकोशः. अमरसिंहकृतः निर्णय सागर प्रेस बम्बई, 1961

भारतीयदर्शन वृहत्कोश. बच्चुलाल अवस्थी. शारदा पाब्लिशिंग हाउस, 2004

Encyclopaedia of Indian philosophy by Karl H. Potter, Motilal Banarasi Das, Delhi, 1970

English-Sanskrit dictionary by Monier William. Munshiram Manoharlal Das, Delhi, 1976.

**E Sources-**

www.google.com
www.indiacat.in
www.jnu.ac.in
www.worldcat.in–

**पाद टिप्पणी**

1. नापि संस्कार्यो मोक्षः पेन व्यापारमपेक्षेत। संस्कारो हि नाम संस्कार्यस्य गुणाधानेन वा स्यात् दोषापनयनेन वा। ब्रह्मसूत्रशाङ्करभाष्यम्, प्रकटार्थविवरणम् १/१/४
2. वेदान्तसारः पृ. ६०
3. ब्रह्मसूत्रशाङ्करभाष्यम्, प्रकटार्थविवरणम् १/१/४
4. मुण्डकोपनिषद् ३/२/६
5. ण्डकोपनिषद् ३/२/७
6. ण्डकोपनिषद् १/१/७
7. मुण्डकोपनिषद् २/२/८
8. शावास्योपनिषद् ६
9. बृहदारण्यकोपनिषद् २/४/५
10. वैष्कर्यसिद्धिः १/६
11. अद्वैतसिद्धिः लघुचन्द्रिका, पू.२
12. श्रीमद्भगवद्गीता शाङ्करभाष्यम् १४/१०
13. वेदान्तसारः विद्वन्मनोरञ्जिनी टीका पु. ८०
14. वेदान्तसारः पृ. २६५
15. कि बहुना देहयात्रा मात्रार्थमिच्छानिच्छापरेच्छा प्रापितानि सुखदुः
16. सम्यक्दर्शनिष्ठानां सन्यासिनां सद्योमुक्तिरुक्ता। श्रीमद्भगवद्गीता शाङ्करभाष्यम् पृ. २७६
17. संक्षेपशारीरिकम ४/३८
18. वेदान्तदर्शनम् पृ. ३६०